मानीय तज्जलेन सगरसुतान् तांस्तर्पयामास। ते पूताः स्वर्गं गतवन्तः। इति वाल्मीकिरामायणमतम् ॥ * ॥ प्रकारान्तरम्। वामनदेवस्य बलेः सकाशात्त्रिलोकहरणकाले ब्रह्माण्डोपरिगतवामपादाङ्गुष्ठनखजनितविवरेण ब्रह्माण्डोर्द्ध्वस्थिता या जलधारा तच्चरणस्पर्शेन समधिकपूता सती ध्रुवलोके पपात। ततो देवमार्गेण सुमेरुपर्व्वतोपरि ब्रह्मसदने पतित्वा सीतालकनन्दा वंक्षुर्भद्रेति चतुर्द्धा भूत्वा चतुर्दिशमाश्रित्य लवणसमुद्रं प्रविष्टा। तत्र सीता ब्रह्मसदनात् केशराचलशृङ्गेभ्योऽधोऽधः स्रवन्ती गन्धमादनमूर्द्धसु पतित्वा भद्राश्ववर्षमध्येन प्राच्यां दिशि एवं वंक्षुर्माल्यवच्छिखरान्निपत्य केतुमालवर्षमध्येन प्रतीच्यामपरं भद्रा गिरिशृङ्गाण्यतिक्रम्य शृङ्गवतः शिखरान्निपत्य उत्तरकुरुवर्षमध्येनोदीच्यामतोऽलकनन्दा बहुपर्व्वतशृङ्गाण्यतिक्रम्य हिमकूटान्निपत्य भारतवर्षमध्येन दक्षिणस्यां दिश्येवंक्रमेण लवणसमुद्रं सर्व्वाः प्रविष्टाः। इति भागवतमतम् ॥ * ॥ अस्याः पृथिव्यामवतरणकालस्तु आदित्यपुराणे।

"वैशाखशुक्लपक्षे तु तृतीयायां युधिष्ठिर !।
यवानुत्पादयामास युगञ्चारब्धवान् कृतम् ॥
ब्रह्मलोकात् त्रिपथगां पृथिव्यामवतारयत्।
तस्यां कार्य्यौं यवैर्होमो यवैर्विष्णुं समर्च्चयेत् ॥" * ॥

अस्या हिमालयान्निर्गताया दशहरा संज्ञा। तथा च स्मृतिः।

"ज्यैष्ठे मासि क्षितिसुतदिने शुक्लपक्षे दशम्यां
हस्ते शैलान्निरगमदियं जाह्नवी मर्त्यलोकम्।
पापान्यस्यां हरति च तिथौ सा दशेत्याहुरार्य्याः
पुण्यं दद्यादपि शतगुणं वाजिमेधायुतस्य ॥" * ॥

अथ गङ्गाध्यानम्। भविष्ये।

"चतुर्भुजां त्रिनेत्राञ्च सर्व्वावयवभूषिताम्।
रत्नकुम्भां सिताम्भोजां वरदामभयप्रदाम् ॥
श्वेतवस्त्रपरीधानां मुक्तामणिविभूषिताम्।
ततो ध्यायेत् सुरूपाञ्च चन्द्रायुतसमप्रभाम् ॥
चामरैर्वीज्यमानाञ्च श्वेतच्छत्रोपशोभिताम्।
सुप्रसन्नां सुवदनां करुणार्द्रनिजान्तराम् ॥
सुधाप्लावितभूपृष्ठामार्द्रगन्धानुलेपनाम्।
त्रैलोक्यनमितां गङ्गां देवादिभिरभिष्टुताम् ॥
दिव्यरूपविभूषाञ्च दिव्यमाल्यानुलेपनाम् ॥"

अपि च।

"सितमकरनिषण्णां शुक्लवर्णां त्रिनेत्रां
करधृतकमलोद्यत्सूत्पलाऽभीत्यभीष्टाम्।
विधिहरहरिरूपां सेन्दुकोटीरचूडां
कलितसितदुकूलां जाह्नवीं तां नमामि ॥" * ॥

अथ गङ्गामाहात्म्यश्रवणपठनफलम्। यथा,— भविष्ये।

"माहात्म्यं ये च गङ्गायाः शृण्वन्ति च पठन्ति च।
तेऽप्यसंख्यैर्महापापैर्मुच्यन्ते नात्र संशयः ॥"

अस्याः स्मरणफलम्। [वदन्।

"गच्छंस्तिष्ठन् स्वपन् ध्यायन् जाग्रद्भुञ्जन् श्वसन्
यः स्मरेत् सततं गङ्गां स च मुच्येत बन्धनात् ॥
भवनानि विचित्राणि विचित्राभरणाः स्त्रियः।
आरोग्यं वित्तसम्पत्तिर्गङ्गास्मरणजं फलम् ॥"

अस्या दर्शनादिफलम्। ब्रह्माण्डाग्नेययोः।

"दृष्टा तु हरते पापं स्पृष्टा तु त्रिदिवं नयेत्।
प्रसङ्गेनापि या गङ्गा मोक्षदा त्ववगाहिता ॥"

तथा, भविष्ये।

"यत् फलं जायते पुंसां दर्शनात् परमात्मनः।
तद्भवेदेव गङ्गाया दर्शने भक्तिभावतः ॥"

अस्यां स्नानफलम्। ब्रह्माण्डपुराणे।

"यैः पुण्यवाहिनी गङ्गा सकृद्भक्त्याऽवगाहिता।
तेषां कुलानां लक्षन्तु भवात्तारयते शिवा ॥
अनेकजन्मसम्भूतं पापं पुंसां प्रणश्यति।
स्नानमात्रेण गङ्गायां सद्यः पुण्यस्य भाजनम् ॥"

दानधर्म्मे। [ऽन्त्यजाः।

"अन्धाः क्लीवा जडा व्यङ्गाः पतिता रोगिणो-
गङ्गां संसेव्य पुरुषा देवैर्गच्छन्ति तुल्यताम् ॥
स्नानन्तु भक्त्या गङ्गायां कर्त्तुकामस्य गच्छतः।
पदे पदेऽश्वमेधस्य फलं मर्त्यस्य जायते ॥"

तथा, ब्रह्माण्डे।

"ये गच्छन्ति स्वतो गङ्गां परांश्च प्रेरयन्ति ये।
इह ते सर्व्वभोगानामन्ते ज्ञानस्य भाजनम् ॥"

अस्याः पूजायाः फलम्। आग्नेये।

"गङ्गायां पूजितायान्तु पूजिताः सर्व्वदेवताः।
तस्मात् सर्व्वप्रयत्नेन पूजयेदमरापगाम् ॥" * ॥

तस्यां यज्ञादिकरणफलम्। स्कान्दे।

"यज्ञो दानं तपो जप्यं श्राद्धञ्च सुरपूजनम्।
गङ्गायां यत् कृतं सर्व्वं कोटिकोटिगुणं भवेत् ॥"

तथा भविष्ये।

"सुलभं सकलं पुण्यं यज्ञदानादिजं फलम्।
गङ्गातोयैस्तु सतिलैर्दुर्लभं पितृतर्पणम् ॥
गयाश्राद्धं कृतं तेन उत्सृष्टस्तु वृषस्तथा।
येन तद्वीचिसंसिक्ते तीरे श्राद्धमकारि च ॥" * ॥

तज्जलपानफलम्। भविष्ये।

"गण्डूषमात्रपानेन अश्वमेधफलं लभेत्।
स्वच्छन्दं यः पिबेदापस्तस्य मुक्तिः करे स्थिता ॥
त्रिभिः सारस्वतं तोयं सप्तभिस्त्वथ यामुनम्।
नार्म्मदं दशभिर्मासैर्गाङ्गं वर्षेण जीर्य्यति ॥
नाभ्यन्तर्गततोयानां मृतानां क्वापि देहिनाम्।
तत्तत्तीर्थफलप्राप्तिर्नात्र कार्य्या विचारणा ॥"

यमोक्तौ।

"क्षेत्रस्थमुद्धृतं वापि शीतमुष्णमथापि वा।
गाङ्गेयं हरते पापमाजन्ममरणान्तिकम् ॥" * ॥

अस्यां मरणफलम्। कूर्म्मपुराणे।

"गङ्गायां ज्ञानतो मृत्वा मुक्तिमाप्नोति मानवः।
अज्ञानाद्ब्रह्मलोकञ्च याति नास्त्यत्र संशयः ॥
गङ्गायाञ्च जले मोक्षो वाराणस्यां जले स्थले।
अन्तरीक्षे च गङ्गायां गङ्गासागरसङ्गमे ॥"

तथा च, स्मृतौ।

"शुक्लपक्षे दिवा भूमौ गङ्गायामुत्तरायणे।
धन्या देहं विमुञ्चन्ति हृदयस्थे जनार्द्दने ॥" * ॥

तत्रास्थिनिक्षेपफलम्।

"दशाहाभ्यन्तरे यस्य गङ्गातोयेऽस्थि मज्जति।
गङ्गायां मरणे यादृक् स तादृक् फलमाप्नुयात् ॥" *

तत्र त्रयोदशक्रियावर्जनं यथा, ब्रह्माण्डे।

"गङ्गां पुण्यजलां प्राप्य त्रयोदश विवर्ज्जयेत्।
शौचमाचमनं सेकं निर्माल्यं मलघर्षणम् ॥
गात्रसम्वाहनं क्रीडां प्रतिग्रहमथो रतिम्।
अन्यतीर्थरतिञ्चैव अन्यतीर्थप्रशंसनम्।
वस्त्रत्यागमथाघातं सन्तारञ्च विशेषतः ॥" * ॥

अथ नारायणक्षेत्रलक्षणम्। ब्रह्मपुराणे।

"प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम्।
अत्र नारायणः स्वामी नान्यः स्वामी कदाचन ॥"

अथ गर्भतीरयोर्लक्षणम्।

"भाद्रकृष्णचतुर्द्दश्यां यावदाक्रमते जलम्।
तावद्गर्भं विजानीयात् तदूर्द्ध्वं तीरमुच्यते।
सार्द्धहस्तशतं यावद्गर्भतस्तीरमुच्यते ॥" * ॥

तीरे प्रतिग्रहादिनिषेधो यथा,—

"तीरे प्रतिग्रहस्त्याज्यस्त्याज्यो धर्म्मस्य विक्रयः ॥"

अथ गङ्गाक्षेत्रफलम्। स्कान्दे।

"तीराद्गव्यूतिमात्रन्तु परितः क्षेत्रमुच्यत।
अत्र यद्यत् कृतं कर्म्म गङ्गायां नात्र संशयः।
अत्रस्थास्त्रिदिवं यान्ति ये मृतास्तेऽपुनर्भवाः ॥"

इति प्रायश्चित्ततत्त्वम् ॥ * ॥

(अस्या माहात्म्यं यथा, महाभारते। ३। ८५। ६४।

"न गङ्गा सदृशं तीर्थं न देवः केशवात् परः।
ब्राह्मणेभ्यः परं नास्ति एवमाह पितामहः ॥"

अस्याश्च माहात्म्यवर्णने सहस्रनामकथनं यथा, काशीखण्डे २६ अध्याये।

अगस्त्य उवाच।

"विना स्नानेन गङ्गायां नृणां जन्म निरर्थकम्।
उपायान्तरमस्त्यन्यद् येन स्नानफलं लभेत् ॥
अशक्तानां च पङ्गूनामालस्योपहतात्मनाम्।
दूरदेशान्तरस्थानां गङ्गास्नानं कथं भवेत् ॥
दानं वाथ व्रतं वाथ मन्त्रः स्तोत्रं जपोऽथवा।
तीर्थान्तराभिषेको वा देवतोपासनन्तु वा ॥
यद्यस्ति किञ्चित् षड्वक्त्र ! गङ्गास्नानफलप्रदम्।
विधानान्तरमात्रेण तद्वद प्रणताय मे ॥
त्वत्तो न वेद स्कन्दान्यो गङ्गागर्भसमुद्भव !।
परं स्वर्गतरङ्गिण्या महिमानं महामते ! ॥

स्कन्द उवाच।

सन्ति पुण्यजलानीह सरांसि सरितो मुने !।
स्थाने स्थाने च तीर्थानि जितात्माध्युषितानि च ॥
दृष्टप्रत्ययकारीणि महामहिमभाञ्ज्यपि।
परं स्वर्गतरङ्गिण्याः कोट्यंशोऽपि न तत्र वै ॥
अनेनैवानुमानेन बुध्यस्व कलशोद्भव !।
दध्रे गङ्गोत्तमाङ्गेन देवदेवेन शम्भुना ॥
स्नानकालेऽन्यतीर्थेषु जप्यते जाह्नवी जनैः।
विना विष्णुपदीं क्वान्यत् समर्थमघमोचने ॥
गङ्गास्नानफलं ब्रह्मन् ! गङ्गायामेव लभ्यते।
यथा द्राक्षाफलस्वादो द्राक्षायामेव नान्यतः ॥ १० ॥
अस्त्युपाय इह त्वेकः स्याद्येनाविकलं फलम्।
स्नानस्य देवसरितो महागुह्यतमो मुने ! ॥
शिवभक्ताय शान्ताय विष्णुभक्तिपराय च।
श्रद्धालवे त्वास्तिकाय गर्भवासमुमुक्षवे ॥